# Paramahansopanishat

# પરમહંસોપનિષત્

## Document Information

Text title : paramaha.nsopaniShat

File name : paramahamsa_upan.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Anshuman Pandey pandey at umich.edu

Latest update : April 16, 1996

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# પરમહંસોપનિષત્

ૐ ભદ્રં કર્ણેભિઃ શ઼ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ।
હરિઃ ૐ ॥

અથ યોગિનં પરમહંસનં કોઽયં માર્નસ્તેષં કા સ્થિતિરિતિ નારદો ભગવન્તમુપગત્યોવાચ । તં ભગવાનાઃ । યોઽયં પરમહંસમાર્ગો લોકે દુર્લભતરો ન તુ બાહુલ્યો યદ્યેકો ભવતિ સ એવ નિત્યપૂતસ્થઃ સ એવ વેદપુરુષ ઇતિ વિદુષો મન્યન્તે મહાપુરુષો યચ્ચિત્તં તત્સર્વદા મય્યેવાવતિષ્ટતે તસ્માદહં ચ તસ્મિન્નેવાવસ્થીયતે । અસૌ સ્વપુત્રમિત્રકલત્રબન્વ્વાદીઞ્શિખાયજ્ઞોપવીતે
સ્વાધ્યાયં ચ સર્વકર્માણિ
સંન્યસ્યાયં બ્રહ્માણ્ડં ચ હિત્વા કૌપીનં દણ્ડમાચ્છાદનં ચ સ્વશરીરોપભોગાર્થાય ચ લોકસ્યોપકારાર્થાય ચ પરિગ્રહેત્તચ્ચ ન મુખ્યોઽસ્તિ કોઽયં મુખ્ય ઇતિ ચેદયં મુખ્યઃ ॥ ૧॥

ન દણ્ડં ન શિખં ન યજ્ઞોપવીતં ન ચાચ્છાદનં ચરતિ પરમહંસઃ । ન શિતં ન ચોષ્ણં ન સુખં ન દુઃખં ન માનાવમાને ચ ષડૂર્મિવર્જં નિન્દાગર્વમત્સરદમ્મદર્પેચ્છાદ્વેષસુખદુઃખકામકોધલોભમોહહર્ષસુ ઉયાહંકારાદીંશ્ચ હિત્વા સ્વવપુઃ કુણપમિવ દૃષ્યતે યતસ્તદ્વપુરપધ્વસ્તં સંશયવિપરીતમિથ્યાજ્ઞાનાનાં યો હેતુસ્તેન નિત્યનિવૃત્તસ્તન્નિત્યબોધસ્તત્સ્વયમેવાવસ્થિતિસ્તં શન્તમચલમદ્વયાનન્દવિજ્ઞાનઘન એવાસ્મિ ।
તદેવ મમ પરમ્ધામ તદેવ શિખા ચ તદેવોપવીત ચ ।

પરમાત્માત્મનોરેકત્વજ્ઞાનેન તયોર્ભેદ એવ વિભગ્નઃ સા સધ્યા ॥ ૨॥

સર્વાન્કામાન્પરિત્યજ્ય અદ્વૈતે પરમસ્થિતિઃ ।
જ્ઞાનદણ્ડો ધૃતો યેન એકદણ્ડો સ ઉચ્યતે ॥

કાષ્ઠદણ્ડો ધૃતો યેન સર્વાશિ જ્ઞાનવર્જિતઃ ।
સ યાતિ નરકાન્ઘોરાન્મહારૌરવસઞ્જ્ઞકાન્ ॥

ઇદમન્તરં જ્ઞાત્વા સ પરમહંસઃ ॥ ૩॥

આશામ્બરો ન નમસ્કારો ન સ્વધાકારો ન નિન્દા ન સ્તુતિર્યાદૃચ્છિકો
ભવેદ્ભિક્ષુર્નાઽઽવાહનં ન વિસર્જનં ન મન્ત્રં ન ધ્યાનં
નોપાસનં ચ ન લક્ષ્યં નાલક્ષ્યં ન પૃથગ્નાપૃથગહં
ન ન ત્વં ન સર્વં ચાનિકેતસ્થિતિરેવ ભિક્ષુઃ સૌવર્ણાદીનં
નૈવ પરિગ્રહેન્ન લોકં નાવલોકં ચાઽઽબાધકં ક ઇતિ
ચેદ્બાધકોઽસ્ત્યેવ યસ્માદ્ભિક્ષુર્હિરણ્યં રસેન દૃષ્ટં
ચ સ બ્રહ્મહા ભવેત્ ।
યસ્માદ્ભિક્ષુર્હિરણ્યં રસેન ગ્રાહ્યં ચ સ આત્મહા ભવેત્ ।
તસ્માદ્ભિક્ષુર્હિરણ્યં રસેન ન દૃષ્ટં ચ ન
સ્પૃષ્ટં ચ ન ગ્રાહ્યં ચ । સર્વે કામા મનોગતા
વ્યાવર્તન્તે । દુઃખે નોદ્વિગ્નઃ સુખે ન સ્પૃહા ત્યાગો રાગે સર્વત્ર
શુભાશુભયોરનભિસ્નેહો ન દ્વેષ્ટિ ન મોદં ચ । સર્વેષામિન્દ્રિયાણાં
ગતિરુપરમતે ય આત્મન્યેવાવસ્થીયતે
યત્પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્માહમસ્મીતિ
કૃતકૃત્યો ભવતિ કૃતકૃત્યો ભવતિ ॥ ૪॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ।
હરિઃ ૐ ॥

ઇતિ શ્રીપરમહંસોપનિષત્સમાપ્તા ॥

Encoded and proofread by Anshuman Pandey pandey at umich.edu

*Paramahansopanishat*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*